अनुक्रमांकः ....................................
निरीक्षकस्य हस्ताक्षरम् ........................

**Paper Code**
**BV 102**

# पतञ्जलिविश्वविद्यालयः

**परीक्षा - दिसम्बरमासः - 2017**

**शास्त्री / बी.ए. व्याकरणम् (सत्रम् : प्रथमम्)**
**संस्कृत (द्वितीयपत्रम्)**
**संस्कृतव्याकरणम् - खण्ड एक (ख)**

**समयः - होरात्रयम्** **अधिकतमाङ्काः - 75**

---

**सूचना :** इदं प्रश्नपत्रं पञ्चसप्तत्यङ्कानां वर्त्तते। इदं अ, ब, स इति त्रिषु खण्डेषु विभक्तमस्ति।

## खण्डः–अ
### (दीर्घोत्तराः प्रश्नाः)

**सूचना :** 'अ' खण्डे पञ्च दीर्घोत्तराः प्रश्नाः दत्ताः सन्ति, तेषु त्रयाणाम् उत्तरं दीयताम् । प्रत्येकं प्रश्नस्य कृते पञ्चदश अङ्काः निर्धारिताः सन्ति। **(3×15=45)**

**1.** भूवादयो धातवः, यथासंख्यमनुदेशः समानाम्, उपान्मन्त्रकरणे, काशिकादृशा एतेषां व्याख्या कार्या।

**2.** आ कडारादेका संज्ञा, यस्मात्प्रत्ययविधिस्तदादि प्रत्ययेऽङ्गम्, कारके, एतेषां सूत्राणां काशिकानुसारिणी व्याख्या कार्या।

**3.** अकथितं च, गतिश्च, कर्तुरीप्सिततमं कर्म, एतेषां सूत्राणां व्याख्या कार्या।

**4.** यू इति किम्? समास इति किम्? विधिग्रहणं किम्? एतेषां समाधानं कुर्वन्तु।

**5.** विभक्ताविति किम्? कर्मव्यतिहारे इति किम्? प्रहसन इति किम्? एतेषामुदाहरणसहितं समाधानं कुर्वन्तु।

**6.**

## खण्ड–ब
### (लघूत्तरीयप्रश्नाः)

**निर्देशः 'ब'** खण्डे षड्लघूत्तरीयप्रश्नाः प्रदत्ताः सन्ति। प्रत्येकप्रश्नाय पञ्चाङ्काः निर्धारिताः विद्यन्ते। एतेषु केवलं चत्वारः एव प्रश्नाः समाधेयाः। **(4×5=20)**

1. भूवादीनां वकारोऽयं मङ्गलार्थः प्रयुज्यते। भुवौ वार्थं वदन्तीति भ्वर्था वा वादयः स्मृताः।। अस्याः कारिकायाः व्याख्या कार्या।
2. आगमेः क्षमायामात्मनेपदं वक्तव्यम्, अस्य वार्त्तिकस्य उदाहरणसहिता व्याख्या कार्या।
3. स्वराद्यन्तोपसृष्टादिति वक्तव्यम्, अस्य वार्त्तिकस्य व्याख्या कार्या।
4. क्रियाग्रहणमपि कर्त्तव्यम्, अस्य वार्त्तिकस्य सुतरां व्याख्यानं कुर्वन्तु।
5. "किल" अव्ययस्य अर्थं लिखित्वा वाक्यं निर्मापयत।
6. "अपि" अव्ययस्य अर्थं लिखित्वा वाक्यं रचयत।

# खण्डः–स

## (अतिलघूत्तराः प्रश्नाः)

**सूचना** : 'स' खण्डे दश अतिलघूत्तराः प्रश्नाः दत्ताः सन्ति। प्रत्येकं प्रश्नस्य कृते एकैकोऽङ्को निर्धारितोऽस्ति। एतस्य खण्डस्य सर्वे प्रश्नाः अनिवार्याः सन्ति। (10×**1=10**)

1. 'काशिकावृत्तिः' पुस्तकस्य लेखकस्य नाम किमस्ति?
2. 'अष्टाध्यायी' शब्दस्य सिद्धिं कुरुत।
3. 'अव्ययार्थः' अस्य ग्रन्थस्य लेखकः कोऽस्ति?
4. 'व्याकरणकारिकाप्रकाशः' अस्य पुस्तकस्य लेखकः कोऽस्ति?
5. 'व्याकरणम्' इति शब्दस्य सिद्धिं कुर्वन्तु?
6. काशिकाशब्दस्य सिद्धिः कार्या।
7. 'वेद' इति शब्दे को धातुरस्ति?
8. रुच्यर्थे का विभक्तिर्भवति?
9. अङ्गविकारार्थे का विभक्तिर्भवति?
10. 'नमः' शब्दयोगे का विभक्तिर्भवति?

--------------x--------------